Downloaded From : http://cbseportal.com/

# SANSKRIT

**(Second Language)**

**(*Three hours*)**

***Answers to this Paper must be written on the paper provided separately.***

*You will **not** be allowed to write during the first 15 minutes.*

*This time is to be spent in reading the question paper.*

***The time given at the head of this Paper is the time allowed for writing the answers.***

---

*This paper comprises of two Sections : **Section A** and **Section B**.*

*Attempt **all** the questions from Section **A**.*

*Attempt any **four** questions from Section **B**, answering at least **one** question each from the **two** books you have studied and any **two** other questions.*

*The intended marks for questions or parts of questions are given in brackets [ ].*

---

## SECTION A (40 Marks)

*Attempt **all** questions*

**Question 1**

Write a short composition in **Sanskrit** of **150-200** words on any **one** of the following topics :— [15]

अधोलिखितेषु विषयेषु एकं विषयं आधृत्य **150-200** शब्दपरिमितं निबन्धं संस्कृतभाषया लिखत :—

**(i)** जीवसङ्कुलस्य विनाश: परिसरमालिन्येन भवति। अत: मालिन्यप्रकारान् तेषां नियन्त्रणोपायं च विवृणुत।

**(ii)** भारतस्य स्वातन्त्र्यप्राप्त्यर्थं बहव: स्वप्राणान् आर्पयन्। तेषु एकस्य महापुरुषस्य जीवनगाथां लिखित्वा धन्यवादान् अर्पयन्तु।

**(iii)** स्त्रीशिक्षणम्। अस्मिन् विषये प्रबन्धं लिखत।

**(iv)** अमृतवाणी संस्कृतभाषा ललिता हृद्या च इति वर्णयित्वा संस्कृतभाषाविषये निबन्धमेकं लिखत।

---

**This Paper consists of 7 printed pages and 1 blank page.**

T18 191 Turn over

© *Copyright reserved.*

Downloaded From : http://cbseportal.com/ Courtesy : CISCE

Downloaded From : http://cbseportal.com/

(v) (Picture Composition) प्रस्तुतं चित्रम् आधृत्य संस्कृतभाषायाम् एकं लघु-निबन्धं लिखत :—



**Question 2**

Write a letter in **Sanskrit** on any **one** of the following topics :— [7]

अधोलिखितयो: विषययो: एकं विषयम् आधृत्य पत्रमेकं **संस्कृतभाषया** लिखत :—

(i) त्वं छात्रावासे वससि इति मत्वा, वार्षिकपरीक्षाया: सिद्धतां कथम् अकरो: इति निरुप्य पितरं प्रति पत्रम् लिखत।

(ii) भवत:/भवत्या: अनारोग्य कारणं उक्त्वा दिनत्रयस्य विरामं प्रार्थयित्वा विद्यालयस्य प्राचार्यमहोदयाय पत्रमेकं लिखत।



Downloaded From : http://cbseportal.com/ Courtesy : CISCE

Downloaded From :http://cbseportal.com/

## Question 3

Read the passage given below and answer in **Sanskrit** the questions that follow, using your own words as far as possible :—

दत्तं अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि यथासंभवं स्वशब्देषु **संस्कृतभाषया** देयानि :—

कस्मिंश्चित् ग्रामे आसीत् काचित् वृद्धा ! तस्याः चत्वारः पुत्राः आसन्। ते सर्वे श्रमजीविनः शूराः च। एकदा तस्याः देशस्य उपरि शत्रूणाम् आक्रमणं भवति। तदा देशे सर्वत्र युवकान् सैन्ये प्रवेशयितुं निवेदयन्ति। तच्छ्रुत्वा वृद्धा ज्येष्ठपुत्रमाहूय वदति "पुत्र, देशरक्षणम् अस्माकं कर्तव्यम्। अस्माकं देशः इदानीं विपत्काले अस्ति। अतः त्वं सैन्यं प्रविश्य मातृभूमिरक्षणं कुरु" इति। पुत्रः आनन्देन मातृवचनम् अङ्गीकृत्य सैन्यं प्रविशति, शौर्येण युद्धं करोति, परं वीरमरणं प्राप्स्यति। वृद्धा पुत्रस्य मरणवार्तां श्रुत्वा किञ्चिदपि विचलिता न भवति, परं द्वितीयं पुत्रमाहूय युद्धार्थं प्रेषयति। द्वितीयपुत्रोऽपि मरणं प्राप्नोति।

वृद्धा अधुनापि न खिन्ना, तृतीयं पुत्रं युद्धार्थं प्रेषयति। तृतीयोऽपि मृतो भविष्यति। इदानीं वृद्धा किञ्चित् विचलिता भवति। कनिष्ठं पुत्रमाहूय युद्धार्थं गन्तुं सूचयति। तदा तद्ग्रामीणाः ज्येष्ठाः बन्धुजनाः च वृद्धां वदन्ति– "मातः ! भवती वृद्धा जाता। त्रयः पुत्राः युद्धे मृतास्सन्ति। कनिष्ठपुत्रस्य प्रेषणात्पूर्वं किञ्चित् चिन्तयतु। भवत्याः अन्तिमकाले कोऽपि न भविष्यति। अपि च भवत्याः वंशोद्धारार्थम् अयमेक एव पुत्रः अवशिष्ठः। तस्मात् एतं मृत्युमुखं मा प्रेषयतु" इति।

परन्तु वृद्धा "मदीयानां पुत्राणाम् अपेक्षया मम जन्मभूमिरेव श्रेष्ठा। जन्मभूमिरक्षणापेक्षया अन्यत् महाकार्यं नास्त्येव" इत्युक्त्वा कनिष्ठं पुत्रं रणभूमिं प्रेषयति। तत्र घोरं युद्धं प्रवर्तते। वृद्धायाः रात्रौ निद्रा एव नास्ति। तस्याः एकैव चिन्ता 'देशस्य का गतिः भवेदिति'।

अपरस्मिन् दिने ग्रामस्थाः आगत्य दुःखेन कनिष्ठपुत्रस्य मरणवार्तां श्रावयन्ति। तदा वृद्धायाः नयने अश्रुपूर्णे। वृद्धा रोदितुमारब्धा। "मातः ! मया तु पूर्वमेव उक्तं यत् कनिष्ठं पुत्रं युद्धार्थं मा प्रेषयतु इति। भवती मम वचनं नैव श्रुतवती। इदानीं रोदनेन किम् प्रयोजनम्" इति ग्रामस्थः तस्याः सान्त्वनं करोति। तदा वृद्धा माता प्रतिवदति– "भोः ! मम पुत्राः मृताः इति अहं न रोदिमि। किन्तु युद्धार्थं प्रेषयितुं पञ्चमो पुत्रः नास्तीति मम दुःखम्। अधुना देशस्य का गतिः स्यात् ? इति रोदिमि" इति। तदा ग्रामस्थः "तद्विषये चिन्ता मास्तु। भवत्याः पुत्रः पञ्चत्वं गतः, किन्तु देशः तेन रक्षितः। वयमिदानीं विजयशालिनः" इति। एतच्छ्रुत्वा वृद्धा अतीव हृष्टा भवति। अत एव उच्यते जननी जन्मभूमिश्च स्वर्गादपि गरीयसी इति।

प्रश्नाः :

(i) चतुर्थं पुत्रं युद्धार्थं प्रेषयामि इति वदन्तीं वृद्धां सर्वे किमकथयन् ? [2]

(ii) अस्याः कथायाः का शिक्षा प्राप्यते ? [2]

(iii) वृद्धा कुत्र आसीत् ? तस्याः पुत्राः कीदृशाः आसन् ? [2]

(iv) वृद्धा ज्येष्ठपुत्रमाहूय किं वदति ? [2]

(v) ग्रामस्थः वृद्धां किमुक्त्वा सान्त्वनं करोति ? [2]



Downloaded From :http://cbseportal.com/ Courtesy : CISCE

Downloaded From :http://cbseportal.com/

### Question 4

Answer the following according to the instructions given :—

अधोलिखितान् प्रश्नान् यथा निर्देशम् उत्तरयत :—

(i) सन्धि-विच्छेदं कुरुत :— [1]

(अ) सच्चित्

(आ) ज्ञानस्योपशम:

(ii) केवलं समासविग्रहं कुरुत :— [1]

(अ) आत्मज्ञानम्

(आ) प्रतिगृहम्

(iii) प्रकृति-प्रत्ययं विभजनं कृत्वा लिखत :— [1]

(अ) गच्छन्

(आ) करणीय

(iv) वाच्यपरिवर्तनं कुरुत :— [1]

(अ) मात्रा गीतं गीयते।

(आ) प्रशान्त: कथां कथयति।

(v) लृट्लकारे परिवर्तनं कुरुत :— [1]

(अ) छात्र: उत्तरं जानाति।

(आ) त्वं कार्यं करोषि।

(vi) वाक्यदोषान् परिहरत :— [1]

(अ) गृहस्य बहि: कुक्कुर: अस्ति।

(आ) विक्रम: सिंहासने अधितिष्ठति।

(vii) संयोज्य लिखत :— [1]

(अ) भृगो: अपत्यं पुमान् ..................।

(आ) रूपम् अस्य अस्तीति ...............।

(viii) 'ट' वर्णस्य उत्पत्तिस्थानं लिखत। [1]



Downloaded From :http://cbseportal.com/ Courtesy : CISCE

Downloaded From : http://cbseportal.com/

## SECTION B (40 Marks)

*Attempt any **four** questions from Section **B**, answering at least **one** question each from the **two** books you have studied and any **two** other questions.*

### संस्कृतवाणी—भाग-4

### आचार्य देवो भव

**Question 5**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया देयानि :—

गुरवे सम्मानं देयम् इति शिष्यस्य आद्यं कर्तव्यम्। यः शिष्यः गुरवे गौरवं ददाति सः दैवानुग्रहं प्राप्य जीवने सुखं प्राप्नोति। गुरोः सेवयैव ज्ञानप्राप्तिः संभवा। गुरोः कृपयैव ऋषयो महर्षयः कवयः महाकवयश्च विविध–विषयेषु निष्णाताः जाताः।

(i) समाजे आदर्शव्यक्तीनाम् उपकारः सदा किमर्थं स्मरणीयः भवति ? [2]

(ii) अध्यापकः महापुरुषेषु अन्यतमः। अतः सः छात्राणां कृते किं किं करोति ? [2]

(iii) आचार्यस्य सम्मानः किमर्थं सर्वैः अवश्यमेव करणीयः ? [3]

(iv) गुरूणां महत्त्वं प्राचीनकाले कथम् अवर्तत ? [3]

### दैवानुग्रहम्

**Question 6**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया देयानि :—

कस्मिंश्चिद् ग्रामे हरिशर्मा नाम दरिद्रः मूर्खश्च भूसुरः आसीत्। तस्य अनेके पुत्राः आसन्। कुटुम्बनिर्वहणार्थं सः प्रतिदिनं भिक्षाटनं करोति स्म। एवं भिक्षाटनं कुर्वन् सः सकुटुम्बं किञ्चित् नगरम् आगतवान्। तत्र स्थूलदत्तो नाम धनिकस्य गृहं गतवान्।

(i) हरिशर्मा कः ? सः कथं कुटुम्बनिर्वहणं करोति स्म ? [2]

(ii) विवाहोत्सवसन्दर्भे हरिशर्मा किम् अचिन्तयत् ? [2]

(iii) जिह्वा किमर्थं कम्पिता अभवत् ? सा हरिशर्माणं किमुक्तवती ? [3]

(iv) हरिशर्मा दैवज्ञः इति राजा कथं निश्चितवान् ? [3]



Downloaded From : http://cbseportal.com/ Courtesy : CISCE

Downloaded From : http://cbseportal.com/

अस्माकं देश:

**Question 7**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

भारतस्य स्थानं विश्वस्य सर्वेष्वेव देशेषु प्राचीनतमं विशिष्टतमं च अस्ति। भारतवर्षम् उत्तरदिशायां हिमालयपर्वतादारभ्य दक्षिणस्यां दिशि कन्याकुमारीपर्यन्तं विस्तृतं वर्तते। उत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराज: भारतमातु: शिरसि रजतमुकुटमिव सुशोभते। स: प्रहरीव भारतं रक्षति।

(i) अस्माकं देशे धार्मिकसहिष्णुता दृढा अस्ति। समर्थयत। [2]

(ii) भौगोलिकरीत्या भारतस्य सीमां वर्णयत। [2]

(iii) भारतं प्रति भारतीयाणां कर्तव्यं किम् ? [3]

(iv) विदेशीया: अपि भारतस्य सौन्दर्यं दृष्ट्वा मुदिता: भवन्ति कुत: ? [3]

## संस्कृतवाणी—भाग-5

### परोपकारार्थम् इदं शरीरम्

**Question 8**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

मनसा वाचा कर्मणा परेषाम् उपकार: परोपकार: कथ्यते। य: परोपकारं करोति, तस्य मानसं पवित्रं विनयोपेतं सरसं च जायते। परोपकारिण: अन्येषां कष्टं स्वकीयं कष्टं मत्वा तन्नाशाय चेष्टन्ते।

(i) प्रकृतिरपि परोपकारं करोति इति कवि: कथमुक्तवान् ? [2]

(ii) एकदा लुब्धक: गहनारण्यं प्राविशत्। तदा किमभवत् ? [2]

(iii) दयापूरितस्वरेण वृक: लुब्धकं किमवदत्। [3]

(iv) कृतघ्न: लुब्धक: मां मारयितुम् उद्यत: इति ज्ञात्वापि वृक: व्याघ्रं किं प्रत्युत्तरं दत्तवान् ? [3]



Downloaded From : http://cbseportal.com/ Courtesy : CISCE

Downloaded From : http://cbseportal.com/

## प्रार्थना

**Question 9**

Read the verses given below and answer in **Sanskrit** the questions that follow :—

अधोलिखित श्लोकं पठित्वा तस्याधोलिखित प्रश्नानाम् उत्तराणि **संस्कृत** भाषया देयानि :—

वक्रतुण्ड ! महाकाय ! कोटिसूर्यसमप्रभ
अविघ्नं कुरु मे देव ! सर्वकार्येषु सर्वदा।।
सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखमाप्नुयात्।।

(i) अञ्जनानन्दनः कः ? सः किं कि कृतवान् ? [2]

(ii) मानवः कदा सुखी भवति ? [2]

(iii) ईशावास्यमिदं सर्वं
यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः
मा गृधः कस्यस्विद्धनम्।। तात्पर्यं लिखत। [3]

(iv) एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्च।। तात्पर्यं लिखत। [3]

## युक्तिः शक्तेः गरीयसी

**Question 10**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :—

लोकहिताय कुत्सितानां नृशंसानां कृत्यानाम् अन्तम् अनिवार्यम्। दुष्टराक्षसस्य अन्तकालोऽपि सन्निहितः।

कुशालः नाम युवकेन अस्य राक्षसस्य क्रूर-कृत्यानि श्रुतानि। सः युवकः तं मारयितुं ग्रामवासिनः जनान् मृगान् च तस्मात् रक्षितुं निश्चयं कृतवान्।

(i) युक्तिः शक्तेः गरीयसी अस्याः उक्तेः अर्थं लिखत। [2]

(ii) कुशालः किं कर्तुं निश्चितवान् ? तदर्थं कुत्र गतवान् ? [2]

(iii) राक्षसः कथमासीत् ? सः हसित्वा कुशालं किमुक्तवान् ? [3]

(iv) कुशालः ग्रामवासिजनानां भयं कथं निवारितवान् ? [3]



Downloaded From : http://cbseportal.com/ Courtesy : CISCE